अवसाननिर्णयशिक्षा

नमस्कृत्य तु तं देवं शङ्करस्य सुतं प्रभुम्
यस्य प्रसादाद्देवस्य बुद्धिभेदोऽत्यभून्मम १

अवसानं तु वक्ष्यामि यथावदनुपूर्वशः २

इषे त्वा भूताय कुक्कुटोऽसि जनयत्त्यै त्वा मा भेःपृथिवि देवयजन्यदित्त्यै व्युन्दनमस्क्कन्नमद्याग्नेव्वेरग्नेऽदब्धायो दिवि व्विष्णुरग्ने व्रतपतेऽन्धस्त्यैषते रुद्र भागः स्वाहा यज्ञमेष ते गायत्रीव्वरुणस्योत्तम्भनमग्नेस्तनूः सिँह्यसीन्द्रघोष-स्त्वासिँह्यसि ध्रुवोऽसि रक्षोहणँ व्वलगहनँस्वराडसिरक्षोहणो वो मित्रस्य मा देवीरापो व्वाचन्तेसमुद्रङ्गच्छ मनो मे तर्प्पयत स्वाङ्कृतोऽस्युपयामगृही-तोऽस्याग्रयणः सोमः पवते मित्रावरुणाब्भ्यान्त्वात्मने मे मधवे त्वाग्नये त्त्वा मह्यंयस्तेऽश्वसनिरग्नये त्वा गायत्रच्छन्दसं व्रेशीनान्त्वोशिक्त्वन्देवा-न्दिवमापये स्वाहाग्निरेकाक्षरेण मित्रोव्वसवस्त्रयोदशाक्षरेणैष ते ये देवाविर्म्मर्य्या ऊद्धूर्वामारोहाग्निः पृथुः सवित्रा प्रसवित्रा पृथिव्याःसधस्था-द्वसवस्त्वोभयोरदितिष्ट्वा वसवस्त्वाकृतिमग्निम् ३

विष्णोः त्क्रमश्चिदस्यपान्त्वायम्पुरः पञ्च सजूर्ऋतुभिरनड्वान्वयोराज्ञस्यायुर्म्मे पृथिवीच्छन्दोऽग्निर्देवताशुस्त्रिवृन्नवविंशत्त्यास्तुवताच्छच्छन्दस्तन्तुना रा-यस्त्रिवृदसि राज्ञयसि व्विराडसि सम्राडसिस्वराडस्यधिपत्र्यसि सहस्रस्य प्रमा सेनाभ्याशवेशङ्कवे शम्भवाय पर्णायेमा मे नृषदे वेड्वाजश्चसप्त-विंश-तिः समुद्रोऽसि स्वर्णधर्मस्तेजोऽसिप्रथमा द्वितीयैरश्वब्भ्यान्त्वा होता यक्षत्त्समिधाग्निन्द्वादशाश्विनौ सरस्वतीञ्चत्वारोऽग्निँस्विष्टकृतन्देवोऽग्निः स्विष्टकृत्त्वामद्याग्नये स्वाहाहिङ्काराय यते कायाब्रह्मन्नध्यायान्तस्ता उ-भावश्वस्तूपरोऽध्यायान्तःशादन्दद्भिर्न्नवाग्नेयः कृष्णग्रीवस्तिस्रो ब्रह्मणे ब्राह्मणं सप्तदश सुमित्रियानः सुमित्रिया नः सुमित्रिया न एधोऽसीतिद्वे शते चतुस्त्रिंशदित्यन्त्यावसानानि ४

अथ त्र्यवसानानि

युष्मा इन्द्रोऽग्ने ब्रह्म सँव्वपामि पुरा क्रूरस्यसवितुस्त्वा गन्धर्व्वस्त्वोपहूतो द्यौरेषा ते व्वसुब्भ्यस्त्वा व्वेदोऽस्यग्निज्र्ज्योतिः संहितास्युपहूता इहैदं द्वाकूत्यै प्रयुज ऊर्ग्गसि द्वे त्वमग्नेऽभित्त्यमदित्त्यास्त्वा भद्रो मे तप्तायनी मेदेवस्य त्वोभयोरुद्विमत्त्यन्यान्घृतेनाक्तौ मनस्त इदमाप ऐन्द्रः प्राणो मापोऽग्नेर्वः सोम राजन्निन्द्रवायू इमेऽयँव्वाँय्यावाङ्कशातम्प्रत्क्रथायँव्वेनो ध्रुवोऽसि कोऽसीन्द्राग्नी आगतं पञ्च सजोषा इन्द्र चतस्रो व्विवस्वन्नादित्य बृहस्प्पतिसुतस्यैजतु दशमास्यआतिष्ठ तिस्र उदुत्त्यँव्वि न इन्द्रेति तिस्र इह रतिः ५

ध्रुवसदन्त्वा ग्रहा ऊर्ज्जाहुतय इन्द्रस्य व्वज्रो यवोयस्ते आ मा व्वाजस्यास्म्मे वः क्षत्रस्योल्बं प्रपर्वतस्य प्रजापते नाश्निब्भ्याम्पच्यस्व कुविदङ्ग पुरीष्योऽस्यृतं सत्त्यमुखाङ्कृणोत्त्वदित्त्यै रास्नास्यूद्ध्वोभवाग्निर्म्मूर्द्धा मधुश्चेमं मा द्वे शुक्रश्च व्विश्श्वकर्मोभयोर्न्नभश्चेषश्च षोडशी स्तोमोऽग्निंहोतारमग्नेत्त्वं तपश्च परमेष्ठी त्वोभयोर्नमोऽस्तु तिस्रायुर्यज्ञेन ऋचो नाम ६

स्वाद्द्वीन्त्वा कुविदङ्ग यदा पिपेषेदं हवीरेतो मूत्रंदृष्ट्वा रूपे निषसाद नाभिर्म्मे त्रया देवा वदापोऽश्विनौ च्छागस्य प्प्रजापतये त्वाग्निः पशुःप्राणाय स्वाहेमा नु कन्द्वेऽग्निश्चाथैतानष्टौयङ्क्रन्दसी आ सुते कुतस्त्वमधि नो दस्रा युवाकवो दैव्यावद्ध्वर्य्यू अस्येदन्द्रो ब्रह्मणस्पतेऽपेतः स्योनापृथिवि भूर्ब्भुवोऽहानि शन्दृते दृंह यमायत्वानाधृष्टा पुरस्ताद्विश्श्वासां भुवां पते यस्तेस्तनो गायत्रीच्छन्दः समुद्राय त्वाभीमं पयसोरेतः स्वाहा प्राणेभ्यो लोमभ्यः स्वाहेति शतमेकचत्वारिंशदित्येतानि त्र्यवसानानि ७

अथ चतुरवसानानि प्रत्युष्टं रक्षोऽग्नीषोमयोरज्झितिं सजूर्द्देवेनेन्धानास्त्वा त्र्यम्बकँय्यजामहेंऽशुरंशुष्टे या ते धामान्युश्म्मसि देवस्य त्वाग्नीषोमाभ्यां मरुत्त्वन्तं वृषभं माहिर्भूरग्नेपवस्वोत्तिष्ठन्नोजसादृश्रमस्य केतवो युवन्तंदेवस्याहञ्ज्योतिष्मन्तं प्रै तु सुपर्णोऽसि विराड्ज्योतिरिमं साहस्रं तिस्रो वायोः पूतः पुनन्तु मा पितर एधोऽसि सँव्वत्सरोऽस्यग्निमद्द्योभयोरिन्द्रस्यौजस्थ ऋजवे त्वा स्वाहा रुद्राय हिरण्मयेनपात्रेणेति द्वात्रिंशदित्येतानि त्र्यवसानानि ८

कृष्णोऽसि नमो व उशिगसि समुद्रोऽसिमधुमतीर्न्न इषः प्राणाय परमे-ष्ठ्यभिधीत इन्द्रश्चप्रोह्यमाणः सोमो विश्वे देवा द्वेऽग्निरेकाक्षरेणपूषा पञ्चाक्षरेण मित्रो नवाक्षरेण व्वृक्ण ऊर्म्मिरर्त्थेतस्थावेष्ट्टा दन्दशूका दक्षिणामारोह प्रतीचीमुदीचीम्मूर्द्धा वयो मा छन्दोऽग्नेर्भागोऽसिवसूनाँय्यवानामेकया स्तुवत नवभिर्नवदशभिः ९

एवश्छन्दोऽरश्मिना सत्त्याय प्रतिपदसि नमो हिरण्यबाहवे बब्भ्लुशाय रोहिताय कृत्स्नायतयोष्णीषिणे विसृजध्वः सभाभ्यो गणेभ्यस्तक्षभ्यः श्व-भ्यःकपर्दिने ह्रस्वाय ज्योष्ठाय सोम्याय वन्नयाय विल्म्मनेस्त्रुत्त्याय कूप्याय वात्त्याय पार्याय सिकत्त्याय ब्रज्यायशुष्क्क्वयाय प्रथममग्निमद्य सूपस्था-द्येतिषट्पञ्चाशदित्येतानि निरवसानानि १०

अथ मध्यावसानानि । द्वितीयं शर्म्मास्यग्ने व्वाजजिद्विभूरस्याददे रावासिद्वे मध्य इन्द्राय त्वा बृहद्द्वते पञ्चेति मध्यावसानानि ११

अथ पञ्चावसानानि
प्रैतु वायुरनिलन्द्वे पञ्चावसाने १२

अथ षडवसानानि
या तेऽग्नेऽयः शया या ते घर्म्म द्वे षडवसाने १३

अथ नवावसानानि
मखस्य शिरोऽश्वस्य त्वा द्वे नवावसाने १४

अथ मर्य्यादा
शतानि चतुर्दश त्रिनवतिद्वर्य्यसानानि १४९३ भवन्ति
द्वे शते त्रयस्त्रिंशदन्त्यावसानानि २३३ भवन्ति
शतं पञ्चाशत्त्यवसानानि १५० भवन्ति
त्रिंशच्चतुरवसानानि ३२ भवन्ति
षट्पञ्चाशन्निखसानानि ५६ भवन्ति
पञ्च मध्यावसानानि ५ भवन्ति

द्वे पञ्चावसाने ५ द्वे षडवसाने २ नवावसाने भवतः
सर्वाण्ययवसानान्येकीकृत्यैकोनविंशतिः शतानि

पञ्चसप्ततिः संख्या कण्डिकायाश्चत्वारिंशदध्याये १९७५

इति श्रीमन्तदेवविरचितावसाननिर्णयशिक्षा समाप्ता

रसवेदाङ्केन्दुमिते १९४६ फाल्गुने शुक्लपक्षके
पूर्णिमायां गुरीवारेऽवसानान्यङ्कितानि वै